"स्मृतिषूक्तानध्यायान् सप्तमीञ्च त्रयोदशीम्।
पक्षयोर्माघमासस्य द्वितीयां परिवर्ज्जयेत्॥"
श्रीपतिव्यवहारसमुच्चये।
"कार्त्तिकस्याश्विनस्यापि फाल्गुनाषाढ़योरपि।
कृष्णपक्षे द्वितीयायामनध्यायं विदुर्बुधाः॥"
भुजबलः।
"चैत्रकृष्णद्वितीयायां तिसृष्वेवाष्टकासु च।
मार्गे च फाल्गुने चैव आषाढ़े कार्त्तिके तथा॥
पक्षयोर्माघमासस्य द्वितीयां परिवर्ज्जयेत्।
नाकालवृष्टौ कुर्व्वीत व्रतबन्धशुभक्रियाम्॥"
उपनयने उत्तरायणशुक्लपक्षयोर्विधानात् कार्त्तिकादौ कृष्णपक्षे च द्वितीयानिषेधः पुनःसंस्कारमर्हति इत्युक्तप्रायश्चित्तरूपोपनयनपरः। वैश्योपनयनपरश्च। तथा च गर्गः।
"विप्रस्य क्षत्त्रियस्यापि मौञ्जी स्यादुत्तरायणे।
दक्षिणे च विशां कार्य्यं नानध्याये न संक्रमे।
अनध्यायेऽपि कुर्व्वीत यस्य नैमित्तिकं भवेत्॥"
अपिना दक्षिणायनकृष्णपक्षयोः समुच्चयः। नैमित्तिकं प्रायश्चित्तरूपम्। चैत्रशुक्लतृतीया आषाढ़शुक्लदशमी मन्वन्तरादित्वेन निषिद्धा। वैशाखशुक्लतृतीया युगादित्वेन निषिद्धा। षष्ठ्यामशुचिरुग्भार्य्यो रिक्तासु बहुदोषभाक्। सामगानां कुजवारेऽप्युपनयनम्। शाखाधिपत्वात्। यथा च।
"शाखाधिपे बलिनि केन्द्रगतेऽथवास्मिन्
वारेऽस्य चोपनयनं कथितं द्विजानाम्।
नीचस्थितेऽरिगृहगेऽथ पराजिते वा
जीवे भृगावुपनयः स्मृतिकर्म्महीनः॥"
अस्य शाखाधिपस्य। कृत्यचिन्तामणौ।
"जन्मोदये जन्मसु तारकासु
मासेऽथवा जन्मनि जन्मभे वा।
व्रतेन विप्रो न बहुश्रुतोऽपि
विद्याविशेषैः प्रथितः पृथिव्याम्॥
अस्तं गते दैत्यगुरौ गुरौ वा
ऋक्षेऽपि वा पापयुतेऽप्यनुक्ते।
व्रतोपनीतो दिवसैः प्रणाशं
प्रयाति दैवैरपि रक्षितो यः॥"
उदये लग्ने। व्रतेन उपनयनेन। इति संस्कारतत्त्वम्॥

यज्युः, त्रि, (यजतीति। यज्+"यजिमनिशुन्धिदसिजनिभ्यो युच्।" उणा० ३। २०। इति युच्।) यजुर्व्वेदवेत्ता ब्राह्मणः। इत्युणादिकोषः॥ यजमानः। इति संक्षिप्तसारोणादिवृत्तिः॥ (यथा, ऋग्वेदे। १। ३१। १३।
"त्वमग्ने यज्यवे पायुरन्तरोऽनिषङ्गाय।"
"हे अग्ने त्वं यज्यवे यष्टुर्यजमानस्य पायुः पालकः।" इति तद्भाष्ये सायणः।)

यज्वा, [न्] पुं, (यज्+"सुयजोर्ङ्वनिप्।" ३। २। १०३। इति ङ्वनिप्।) विधिना इष्टवान्। वेदविधानेन कृतयागः। इत्यमरः। २। ७। ८॥ (यथा, नैषधचरिते। ३। २४।
"राजा स यज्वा विबुधव्रजत्रा
कृत्वाध्वराज्योपमयैव राज्यम्।
भुङ्क्ते श्रितश्रोत्रियसात्कृतश्रीः
पूर्व्वं त्वहो शेषमशेषमन्त्यम्॥")

यज्वनाम्पतिः, पुं, चन्द्रः। इति त्रिकाण्डशेषः॥

यत्, ई ङ यत्ने। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्। अनिड्निष्ठः।) ई, यत्तः। ङ, यतते पठितुं शिष्यः। इति दुर्गादासः॥

यत्, क खेदोपस्करयोः। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) खेद इह ताड़नम्। क, यातयति पुत्त्रं पिता ताड़यति इत्यर्थः। यातयति गृहं गृहिणी उपस्करोति इत्यर्थः। निरः प्रत्यर्पणे। प्रत्यर्पणं परीवर्त्तः। निर्यातयति धान्येन माषान् लोकः धान्यं दत्त्वा माषान् गृह्णाति इत्यर्थः। इति दुर्गादासः॥

यत्, व्य, हेतुः। यस्मात्। इत्यमरः। ३। ४। ३॥ (यथा, उत्तररामचरिते।
"अत्र स्थिता तृणमदात् बहुशो यदेभ्यः
सीता ततो हरिणकैर्न विमुच्यते स्म॥")

यत्, [द्] त्रि, (यजति सर्व्वैः पदार्थैः सह सङ्गतो भवतीति। यज्+"त्यजितनियजिभ्यो डित्।" उणा० १। १३१। इति अदिः डित्।) बुद्धिस्थत्वोपलक्षितधर्म्मावच्छिन्नम्। इति न्यायमतं सिद्धान्तकौमुद्युणादिवृत्तिश्च॥ ये इति भाषा॥ (एकविंशतिविभक्तिषु पुंलिङ्गे तस्य रूपाणि यथा, यः १ यौ २ ये ३। प्रथमा। यम् ४ यौ ५ यान् ६। द्वितीया। येन ७ याभ्याम् ८ यैः ९। तृतीया। यस्मै १० याभ्याम् ११ येभ्यः १२। चतुर्थी। यस्मात् १३ याभ्याम् १४ येभ्यः १५। पञ्चमी। यस्य १६ ययोः १७ येषाम् १८। षष्ठी। यस्मिन् १९ ययोः २० येषु २१। सप्तमी॥ * ॥ स्त्रीलिङ्गे तस्य रूपाणि यथा, या १ ये २ याः ३। प्रथमा। याम् ४ ये ५ याः ६। द्वितीया। यया ७ याभ्याम् ८ याभिः ९। तृतीया। यस्यै १० याभ्याम् ११ याभ्यः १२। चतुर्थी। यस्याः १३ याभ्याम् १४ याभ्यः १५। पञ्चमी। यस्याः १६ ययोः १७ यासाम् १८। षष्ठी। यस्याम् १९ ययोः २० यासु २१। सप्तमी॥ * ॥ क्लीवलिङ्गे तस्य रूपाणि। यत् १ ये २ यानि ३। प्रथमा। यत् ४ ये ५ यानि ६। द्वितीया। शेषः पुंवत्॥)

यतः, व्य, (यद्+"पञ्चम्यास्तसिल्।" ५। ३। ७। इति तसिल्। "तद्धितश्चासर्व्वविभक्तिः।" १। १। ३८। इति तसिल्प्रत्ययान्तस्याव्ययत्वम्।) हेतुः। यस्मात्। इत्यमरः। ३। ४। ३॥ (यथा, मनुः। २। ११७।
"लौकिकं वैदिकं वापि तथाध्यात्मिकमेव च।
आददीत यतो ज्ञानं तं पूर्व्वमभिवादयेत्॥"
यद्+"इतराभ्योऽपि दृश्यन्ते।" ५। ३। १४। इति तसिल्प्रत्ययेन। येन। यथा, भागवते। २। ५। २।
"यद्रूपं यदधिष्ठानं यतः सृष्टमिदं प्रभो!॥"
येभ्यः। यथा, भागवते। १। १५। २१।
"तद्वै धनुस्त इषवः स रथो हयास्ते
सोऽहं रथी नृपतयो यत आनमन्ति॥"
यत्र। यथा, अभिज्ञानशकुन्तले।
"यतो यतः षट्चरणोऽभिवर्त्तते
ततस्ततः प्रेरितवामलोचना॥")

यतमः, त्रि, (यत्+"वा बहूनां जातिपरिप्रश्ने डतमच्।" ५। ३। ९३। इति डतमच्।) बहूनां मध्ये निर्द्धारित एकः। एषां मध्ये यः। यच्छब्दात् डतमप्रत्ययेन निष्पन्नः। इति मुग्धबोधव्याकरणम्॥ ("यतमो भवतां कठः।" इति काशिका॥)

यतरः, त्रि, (यत्+"किं यत्तदो निर्द्धारणे द्वयोरेकस्य डतरच्।"५। ३। ९२। इति डतरच्।) द्वयोर्मध्ये निर्द्धारित एकः। अनयोर्मध्ये यः। यच्छब्दात् डतरप्रत्ययेन निष्पन्नः। इति मुग्धबोधव्याकरणम्॥ (यथा, ऋग्वेदे। ७। १०४। १२।
"तयोर्यत् सत्यं यतरदृजीयस्तदित्सोमोऽवति हन्त्यासत्॥")

यति, त्रि, बहुवचनान्तयावच्छब्दार्थकः। यतगुलि इति भाषा। यच्छब्दात् निपातनात् डतिप्रत्ययेन निष्पन्नम्। इति मुग्धबोधव्याकरणम्॥ (यथा, ऋग्वेदे। १०। १५। १३।
"त्वं वेत्थ यति ते जातवेदः।"
"यति ते यावन्तस्ते भवन्ति।" इति तद्भाष्ये सायणः॥)

यतिः, पुं, (यतते चेष्टते मोक्षार्थमिति। यत्+"सर्व्वधातुभ्य इन्।" उणा० ४। ११७। इति इन्।) निर्ज्जितेन्द्रियग्रामः। तत्पर्य्यायः। यती २। इत्यमरः। २। ७। ४४॥ भिक्षुः ३ संन्यासिकः ४ कर्म्मन्दी ५ रक्तवसनः ६ परिव्राजकः ७ तापसः ८ पाराशरी ९ परिकाङ्क्षी १० मस्करी ११ पारिरक्षकः १२। इति हेमचन्द्रः॥ निकारः। विरतिः। इति तत्रैव नानार्थे॥ * ॥ तस्य वाराणस्यां वासो यथा,—
"अष्टौ मासान् विहारस्तु यतीनां संयतात्मनाम्।
एकत्र चतुरो मासानब्दं वा निवसेत् पुनः॥
अविमुक्ते प्रविष्टानां विहारस्तु न विद्यते।
यतिभिर्मोक्षकामैश्च अविमुक्तं निषेव्यते॥"
इति मात्स्ये अविमुक्तमाहात्म्ये १५९ अध्यायः॥
यतिधर्म्मो यथा,—
"अलाबुं दारुपात्रञ्च मृण्मयं वैदलं तथा।
एतानि यतिपात्राणि मनुः स्वायम्भुवोऽब्रवीत्॥
एककालं चरेद्भैक्ष्यं न प्रसज्जेत विस्तरे।
भैक्ष्ये प्रसक्तो हि यतिर्विषयेष्वपि सज्जति॥
विधूमे सन्नमुषले व्यङ्गारे भुक्तवज्जने।
वृत्ते शरावसम्पाते भिक्षां नित्यं यतिश्चरेत्॥
अलाभे न विषादी स्याल्लाभे चैव न हर्षयेत्।
प्राणयात्रिकमात्रः स्यान्मात्रासङ्गाद्विनिर्गतः॥
अभिपूजितलाभांस्तु जुगुप्सेतैव सर्व्वशः।
अभिपूजितलाभैश्च यतिर्मुक्तोऽपि बध्यते॥